च सर्वतीर्थानां यस्मिन् स्नातः …। सर्वदेवैरनुज्ञातः परमं चाप्नुयात्पदम् VāmaP. 41.30; एवमुक्त्वा ह्यनुज्ञाताः साध्वित्युक्त्वा यपुः सुराः GaṇeP. ii. 123.58; **3B** granted द्वीपाः … गिरयः … ते चान्यैरपि वः कुले। अनुज्ञाताः सुरैः सर्वैः पूर्वमित्येवमागमः PadmP.(Ra.) 6.65.

**अनुज्ञातकार्य** (anujñāta-kārya) *adj.* to whom duty is allowed or assigned निसृष्टार्था अनुज्ञातकार्याः Aparā. 794.12 (*on* 2.187); SmṛtiCan. iv. 528.6.

**अनुज्ञातक्रय** (anujñāta-kraya) *m.* permitted purchase(-price) अनुज्ञातक्रयादुपरि चैषां (वणिजाम्) स्वदेशीयानां पण्यानां पञ्चकं शतमाजीवं स्थापयेत् ArthŚā. ii. 127.3 (4.2)

**अनुज्ञातक्षणायात** (anujñātakṣaṇāyāta) *adj.* who has come at the moment when (he was) remembered आज्ञापयदनुज्ञातक्षणायातं कृताञ्जलिम्। सेनापतिम् PadmP.(Ra.) 2.112 (better read अनुध्यातक्षणायात)

**अनुज्ञातगमन** (anujñāta-gamana) *adj.* whose departure is permitted or allowed हरिवाहनः … अनुज्ञातगमनश्च … साकेतनगरान्निरगच्छत् TilaMañ. 181.10.

**अनुज्ञातत्व** (anujñāta-tva) *n.* the state of being allowed शूद्राविवाहश्च सर्वेषामनुज्ञातत्वात्, न गर्हितः ManuBh. i. 274.14 (*on* 3.145); सुरामद्ययोर्मद्यपानेऽत्यन्तप्रायश्चित्तभेदो न स्यात्। सति तस्मिन् कल्पनायाश्चानुज्ञातत्वात् सुराभाजनस्थानामधिकतरं स्यात् ManuBh. ii. 415.7 (*on* 11.146); ii. 418.4 (*on* 11.156); स्वमातृजातिविहितधर्मानुष्ठानस्यानुज्ञातत्वात् HārLa. 202.17; प्रज्ञाविशेषशालिनां स्ववेदवत् परवेदाध्ययनस्याप्यनुज्ञातत्वात् CaturCin. iii(1). 754.9.

**अनुज्ञातप्रवेश** (anujñāta-praveśa) *adj.* [*f.* -ā] entrance for whom is permitted (i.e. who is permitted to enter) अनुज्ञातप्रवेशोऽसि देवेन BṛKathāŚloSaṁ. 5.27; अनुज्ञातप्रवेशया। कलिङ्गसेनया राजा दूरादेव नमस्कृतः BṛKathāŚloSaṁ. 7.4; स्वयं व्यापारयामास रक्षार्थं शशिशेखरः। अनुज्ञातप्रवेशानां विशेषेण SkandP. iv. 30.22; अनुज्ञातप्रवेशश्च तेनास्थाने महीभुजा। प्रविश्यात्र स्थितान्वादायाचिक्षेप स पण्डितान् KathāSaSāg. x. 10.64.

**अनुज्ञातभक्षण** (anujñāta-bhakṣaṇa) *n.* partaking (of *soma*) by one who is allowed वचनादनुज्ञातभक्षणम् MīmāSū. iii. 5.40.

**अनुज्ञातभिन्न** (anujñāta-bhinna) *adj.* other than what is permitted अतं सिद्धान्नमनुज्ञातभिन्नमपि चान्नम् BālamBha. iii. 57.12 (*on* 3.17)

**अनुज्ञातभोग** (anujñāta-bhoga) *adj.* enjoyment of which is permitted अनुज्ञातभोग आधिर्द्विगुणेऽपि तदुत्थधने प्रविष्ट आ मूलहिरण्यदानाद्भुज्यत एव ManuBh. ii. 73.30 (*on* 8.3)

**अनुज्ञातवत्** (anu-jñātava(n)t) *adj.* [*f.* -ī] who has agreed to, who has allowed नकुलः सहदेवश्च तदनुज्ञातवान्विभो MahāBhā. xv. 44*; अनुज्ञातवती तस्य गमनं कुन्दमालिका BṛKathāŚloSaṁ. 22.257; BālamBha. i. 353.2 (*on* 1.103)

**अनुज्ञातविषय** (anujñāta-viṣaya) *m.* [Loc.] about the permitted cases पृष्ठमांसं च वर्जयेत्। पृष्ठमांसं पृष्ठसंबन्धिमांसम् अनुज्ञातविषयेऽपि VīraMi. (Āhnika.) 530.13; BālamBha. i. 446.19 (*on* 1.181)

**अनुज्ञातव्य** (anu-jñātavya) *adj.* **I** to be permitted or allowed अभिजनानुरूपः पश्चिमो विधिरनुज्ञातव्यः DaśKuC. 86.2; **II** to be accepted or approved तेनावश्यं पदस्मारितनिमित्तभूतार्थस्वरूपाभ्यामेवाकाङ्क्षायोग्यत्वैकवाक्यत्वसनाथाभ्यामिथमन्वितसंविदुदयप्रासादयतीत्यकामेनाप्यनुज्ञातव्यम् NyāyRaMā. 88.19.

**अनुज्ञातव्यवहारनिर्णय** (anujñāta-vyavahāranirṇaya) *adj.* whose decision in judicial procedure is accepted तत्र मन्त्रिणां जातेरविशेषितत्वाच्छूद्रा अपि सभां प्रविष्टा मन्त्रित्वादनुज्ञातव्यवहारनिर्णयाः ManuBh. ii. 81.19 (*on* 8.20)

**अनुज्ञातस्** (anujñā-tas) *adv.* on account of command or order शक्तिसूनोरनुज्ञातः सुतपाः सुव्रतस्त्विदम्।… शास्त्रमथाब्रवीत् BṛParāSm. 1.64.

**अनुज्ञातसाधिमन्** (anujñāta-sādhiman) *adj.* correctness of which is approved सहस्रादयस्तु पृषोदरादित्वादनुज्ञातसाधिमानः Pradī. iv. 277A.12 (*on* v. 1.59)

**अनुज्ञातसोदरविषय** (anujñātasodara-viṣaya) *adj.* having reference to the uterine brother who is permitted विवाहादावधिकारिभूतज्येष्ठेनानुज्ञातसोदरविषयमेतत् SmṛtiCan. v. 177.9.

**अनुज्ञाताधिक** (anujñātādhika) *adj.* more than what is permitted अन्यथा व्यवधानं स्यादनुज्ञाताधिकैरपि (पदार्थैः) ŚāstrDī. 410.16 (*on* v. 1.5)

**अनुज्ञातावगाह** (anujñātāvagaha) *adj.* allowed to take bath अनुज्ञातावगाहांश्च पश्यन्पौरकुमारकान्। सोऽपश्यद्दयितां भीताम् BṛKathāŚloSaṁ. 3.73.

**अनुज्ञातासन** (anujñātāsana) *n.* seat which is assigned अनुज्ञातासनासीनं काश्यपश्चक्रवर्तिनम्।… अब्रवीत् BṛKathāŚloSaṁ. 3.108.

**अनुज्ञातासनच्छत्रचामरा** (anujñātāsanacchatracāmarā) *adj.* (*f.*) to whom a seat (of honour), parasol and chowrie are granted गणे गणे च प्रमुखां मुखराभरणावृताम्। अनुज्ञातासनच्छत्रचामरामकरोन्नृपः BṛKathāŚloSaṁ. 10.186.

**अनुज्ञाति** (anu-jñāti) *f.* permission, consent महानुभावतायोगादनुज्ञातेरभावतः। ह्रीतश्च नान्तिकं वायोरयासिष्टामिमे तदा PadmP.(Ra.) 17.113.

**अनुज्ञातुम्** (anu-jñātum) *inf.* **1A** to permit, to grant permission प्रजाहितार्थमारम्भो गरुडस्य तपोधनाः। चिकीर्षति महत्कर्म तदनुज्ञातुमर्हथ MahāBhā. i. 26.13; कीचकोऽस्याः कृते हतः। सहायानेन दह्येत तदनुज्ञातुमर्हसि MahāBhā. iv. 22.7; युधिष्ठिरेमं बीभत्सुं त्वं सान्त्वयितुमर्हसि। अनुज्ञातुं च कर्णस्य वधायाद्य दुरात्मनः MahāBhā. viii. 50.23; यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ Rāmā. i. 56.17; अहं वः पितरं पुत्राः स्वर्गतम् …। अनुगन्तुमिहेच्छामि तन्मेऽनुज्ञातुमर्हथ BrahmāṇḍP. ii. 30.36; कदाचिदहमभ्यधिकं न्यूनं वा (सोमम्) पिबेयं तदनुज्ञातुमर्हसि ŚābaBh. 1013.7 (*on* iii. 5.43); यथैते त्वत्सकाशादधीयत एवमहमप्यधीयीयेत्यनुज्ञातुमर्हसि ManuBh. i. 135.18 (*on* 2.116); तीर्थयात्रा तु या देव श्वः कर्तव्या सुरोत्तम। तस्यारम्भमनुज्ञातुमर्हसे देव सर्वथा AgniP. 68.8; भृगुणा निर्मितामर्चां गृध्रकूटाग्रतः प्रभो। इहानयितुमिच्छामि तन्मेऽनुज्ञातुमर्हसि NīlaP. 1221; शैलराज।… तस्यां तिथौ … वयं यामस्तदनुज्ञातुमर्हसि VāmaP. 52.62; 65.146; अनुज्ञातुं न शक्नोमि त्वामुत्तानशयाङ्गज NaraP. 31.31; BrahmP. 178.70; सोऽहं त्वया ह्यनुज्ञातस्त्यक्तुमिच्छामि जीवितम्। यदि वाहमनुग्राह्यस्ततोऽनुज्ञातुमर्हसि BhaviP. 117B.19 (i. 66.34); मातरेवं यथोक्तं ते मामनुज्ञातुमर्हसि। पितरं द्रष्टुमिच्छामि यज्ञशालागतं प्रसूः BṛDharmaP. i. 37.25; पुरा त्यक्ता…। लोकापवादभीतेन त्वया राम महावने। प्रत्ययं दास्यते सीता तदनुज्ञातुमर्हसि AdhyāRā. vii. 7.30; धार्तराष्ट्रोऽब्रवीत् तात त्वमनुज्ञातुमर्हसि। आविष्कृतसुखोपायाभिमां मातुलभारतीम् PāṇḍaC.6.219; आत्म्यं धाम कामं प्रयास्याम्यर्हस्यच्छं मामनुज्ञातुमर्हन् ŚaṅkaDig-Vi.(Mā.) 10.69; यदि त्वतिथेरनुज्ञातुं प्रतिभा न भवति तदा ग्रामसीमान्तं गत्वाननुज्ञातोऽपि निवर्तेत VīraMi (Āhnika.) 449.10; **1B** to allow to depart मृगलिप्सुरहं भद्रे पानीयार्थमुपागतः। बहु चाप्यनुयुक्तोऽस्मि तन्मानुज्ञातुमर्हसि MahāBhā. i. 76.15; स वा प्रवेश्यतां मातर्मां वानुज्ञातुमर्हसि MahāBhā. iii. 74.4; ते उपेत्याब्रवीद्यास्ये पुष्करारण्यमुत्तमम्। आमन्त्रयामि वां तन्व्यौ मामनुज्ञातुमर्हथ VāmaP. 65.12; **1C** to forgive (something disagreeable or undesired) इमे प्राणाः सुतश्चायमियं पत्नी मुने मम। येन ते कृत्यमस्त्याशु तद्गृहाणार्घ्यमुत्तमम्। यद्वान्यत् कार्यमस्माभिस्तदनुज्ञातुमर्हसि MārkP. 8.8; **2** to be approved कथं युक्तं शिष्ययोर्विपरीतग्रहणमनुज्ञातुं प्रजापतेः विगतदोषस्य आचार्यस्य सतः ChāndoUBh. 511.6 (*on* viii. 7.4)

**अनुज्ञातृ** (anu-jñātṛ) *adj.* **A** director चतूरूपो ह्ययमोंकार ओतानुज्ञात्रनुज्ञाविकल्पैरोंकाररूपैरात्मैव NṛsimhoTāU. 2; अनुज्ञाता ह्ययमोंकार ओमिति ह्यनुजानाति NṛsimhoTāU. 8; ओतमोतेन जानीयादनुज्ञातारमान्तरम् NṛsimhoTāU. 9; **B** who forgives or condones or pardons (an offence) राजानं गत्वा कर्माचक्षीत तेनैनः स हन्याद्वधे मोक्षः। अनुज्ञातेऽनुज्ञातारमेनःस्पृशति HirŚS. xxvi. 7.2 (103.13); ĀpaDS. i(9). 25.5; **C** who approves अनुज्ञाता सुवार्तानां दीनानामनुकम्पकः AṣṭāSaṁ. i. 11.20 (1.3); **D** who gives consent कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम् BhāgP. iv.21.26; हे देव सवितः सर्वस्यानुज्ञातः अस्मानपि प्रसुव BālamBha. i. 352.29 (*on* 1.103)

**अनुज्ञातृत्व** (anujñātṛ-tva) *n.* the state of being the director नामरूपात्मकं हीदं सर्वं तुरीयत्वाच्चिद्रूपत्वाद्वोतत्वादनुज्ञातृत्वादनुज्ञात्वादविकल्परूपत्वाच्चाविकल्परूपम् NṛsimhoTāU. 2.

**अनुज्ञात्व** (anujñā-tva) *n.* the state of being the direction नामरूपात्मकं हीदं सर्वं तुरीयत्वाच्चिद्रूपत्वाद् वोतत्वादनुज्ञातृत्वादनुज्ञात्वादविकल्परूपत्वाच्च NṛsimhoTāU. 2.

**अनुज्ञात्वा** (anu-jñātvā) *ger.* having known, having learnt सोऽनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटम्। तस्मै गुणगणाढ्याय ददौ तुल्यं प्रहर्षितः BhāgP. iii. 22.22.

**अनुज्ञादान** (anujñā-dāna) *n.* granting of permission एकमेव हि साहाय्यं कुरु मातरतन्द्रिता। अनुज्ञादानमात्रं च आशीर्भिरभिनन्दय SkandP. iv. 19.55; विद्याङ्गमुपनयनम् … गुरुणा क्रियमाणमनुज्ञादानादिना स्वसमीपप्रापणरूपम् ŚivārkaMaDī. i. 487.32 (*on* i. 3.39)

**अनुज्ञादिशास्त्रानर्थक्य** (anujñādiśāstrānarthakya) *n.* futility of the scripture of permissive injunction etc. सम्यग्दर्शिनोऽविद्याभावात् अनुज्ञादिशास्त्रानर्थक्यं प्राप्तम् PrakaVi. 656.23.

**अनुज्ञादिहेतुत्रय** (anujñādi-hetutraya) *n.* triad of causes begi-